दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णषष्ठी
श्रावण 19 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-285 | 1 | अगस्त 04, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**2** संसदवार्ता-सूक्ष्म-लघु-मध्यम-उद्यम-विकास (संशोधन) विधेयकम् (2026):

**3** मेधाविभ्यः १६-१६ सहस्रं रूप्यकाणि प्राप्स्यन्ते, शिक्षकाणां रिक्तानि पदानि पूरयिष्यन्ते, युक्तीकरणं च भविष्यति

**7** शिवशक्तिभ्याञ्च प्रेरिता उत्तराखण्डस्य लोक- संस्कृतिः-

## विधानसभा- उपनिर्वाचने गुजरातस्य मञ्जलपुर-आसनं भाजपा-दलेन रक्षितम्; मध्यप्रदेशस्य दतिया-आसने कॉङ्ग्रेस-दलस्य विजयः, बिहारस्य बाङ्कीपुर-आसने च जन-सुराज-दलस्य प्रशान्त-किशोरः



गुजरातस्य वडोदरा-जनपदस्य मञ्जलपुर-विधानसभा-आसनस्य उपनिर्वाचने भारतीय-जनता-दलस्य प्रत्याशी सतेन्द्रभाई-पटेलः कॉग्रेस-दलस्य भिकाभाई-रबारीं त्रिंशत्-सहस्राधिकैः मतैः पराजित्य विजयं प्राप्य आसनं सुरक्षितम् अकरोत्। अत्रान्तरे बिहारस्य बाङ्कीपुर-क्षेत्रे जन-सुराज-दलस्य प्रत्याशी प्रशान्त-किशोरः अग्रे वर्तते, मध्यप्रदेशस्य दतिया-आसने च कॉग्रेस-प्रत्याशी घनश्याम-सिंहः अग्रसरत्वं भजते; एतेषां त्रयाणामपि क्षेत्राणां कृते मतदानं विगत-मासस्य त्रिंशत् दिनाङ्के अभवत्॥

## ओडिशा-राज्ये नदीनां जलस्तरस्य अपचयेन जलौघ-स्थितिः

ओडिशा-राज्ये नदीनां जलस्तरस्य अपचयेन जलौघ-स्थितिः निरन्तरं अनुकूला दृश्यते। जलाशय-प्रवाहस्य ह्रासं दृष्ट्वा हीराकुण्ड-बन्ध-प्राधिकारिभिः जलस्य निष्कासनं न्यूनीकृतम् । पुनर्निर्माण-कार्यैस्सह राज्य-सर्वकारेण क्षतिग्रस्त गृहाणां सस्य-हानेः च कृते वित्तीय-साहाय्यस्य घोषणा कृता। राज्य-सर्वकारेण जलौघ-क्षतेः विस्तृत-मूल्याङ्कनमपि प्रारब्धम्। येषां कुटुम्बानां गृहाणि पूर्णतः नष्टीभूतानि, तेभ्यः विंशतिसहस्राधिकैकलक्षं यावत् वित्तीय-साहाय्यं घोषितम्। अनेनैव सह आंशिक-क्षतिग्रस्त-गृहाणां अथ च सस्य-हानेः कृते अपि क्षतिपूर्तिः उद्घोषितास्ति।

## लोकसभया सर्वोच्च न्यायालयस्य न्यायाधीशानां सङ्ख्याम् त्रयस्त्रिंशत्तः सप्तत्रिंशत् यावत् वर्धयितुम् विधेयकः पारितः



लोकसभया सर्वोच्च न्यायालय-संशोधन विधेयकः षड्विंशत्यधिक-द्विसहस्रतमः पारितः। अस्य विधेयकस्योद्देश्यं सर्वोच्च न्यायालयस्य अधिनियमे षट्पञ्चाशदधिक-एकोनविंशतितमे संशोधनं विधाय उच्चतम न्यायालयस्य न्यायाधीशानां सङ्ख्या त्रयस्त्रिंशत्तः वर्धयित्वा सप्तत्रिंशत् यावत् करणीया इत्यस्ति । अस्मिन्नेव वर्षे मईमासे राष्ट्रपतिपदासीनया द्रौपदीमुर्मूवर्यया सर्वोच्च न्यायालयस्य न्यायाधीशानां सङ्ख्या त्रयस्त्रिंशत् इत्यतः सप्तत्रिंशत् यावत् वर्धयितुम् कश्चन अध्यादेशः प्रख्यापितः। केन्द्रीय-विधि-न्यायमन्त्री अर्जुनराम मेघवालः विधेयकं उपस्थापितवान्। मेघवालः प्रावोचत् यत् सर्वोच्च न्यायालये प्रलम्बितानाम् प्रकरणानां वर्धमान-सङ्ख्यां निध्याय सहैव न्याय-व्यवस्थां च दृढीकर्तुं एषः विधेयकः आनीतः। ततः परं लोकसभा श्वः प्रातः एकादशवादनं यावत् स्थगिता ।

## उज्बेकिस्तान-गणराज्यस्य विदेशमन्त्री राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मू-वर्यया सह अमिलत्



उज्बेकिस्तान-गणराज्यस्य विदेशमन्त्री सैदोव बख्तियार ओडिलोविचः राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मू-वर्यया सह अमिलत् । ओडिलोविच इत्येतस्य तस्य प्रतिनिधिमण्डलस्य च राष्ट्रपति-भवने स्वागतं कुर्वती राष्ट्रपतिः अवदत् यत् भारत-उज्बेकिस्तानयोः मध्ये गम्भीराः ऐतिहासिकाः, सांस्कृताः, सभ्यतागताः च सम्बन्धाः सन्ति। राष्ट्रपतिः प्रसन्ना भूत्वा उल्लिखितवती यत् उज्बेकिस्तानस्य त्रिसहस्राधिकाः अधिकारिणः, वृत्तिभोगिनः छात्राश्च च भारतीय-प्राविधिक-आर्थिक सहयोग-कार्यक्रमैः प्रशिक्षण पाठ्यक्रमैश्च अन्यैः छात्रवृत्ति-कार्यक्रमैः लाभं अवाप्नुवन्। राष्ट्रपति-मुर्मूः एतदपि विज्ञापितवती यत् षोडश-सहस्राधिकाः भारतीयाः छात्राः उज्बेकिस्तान-देशे उच्च-शिक्षां गृह्णन्तः सन्ति।

## दिल्ली-न्यायालयेन महिला-मल्लयुद्ध-क्रीडिकानां यौन उत्पीड़न-प्रकरणे बृजभूषण-शरण-सिंहः दोषमुक्तः कृतः।



देहल्याः 'राउज एवेन्यू' न्यायालयेन साक्ष्याभावात् भारतीय-मल्लयुद्ध-सङ्घस्य (WFI) पूर्वप्रमुखः बृजभूषण-शरण-सिंहः, तत्कालीनः सचिवः विनोदतोमरः च यौन-शोषण-प्रकरणे दोषमुक्तौ कृतौ। इदं प्रकरणं श्रीसिंहस्य सङ्घप्रमुख-कार्यकाले विश्व-क्रीडा-प्रतियोगितायाः पदक-विजेतुः विनेश फोगाट्-वर्यायाः नेतृत्वे महिला-मल्लैः पञ्जीकृतेन प्रथम-सूचना-प्रतिवेदनेन (FIR) सह सम्बद्धम् आसीत्। अस्य प्रकरणस्य सम्बन्धः त्रयोविंशत्युत्तर-द्विसहस्रतमस्य वर्षस्य एप्रिल-मे-मासाभ्याम् अस्ति, यदा राष्ट्रिय-राजधान्यां जन्तर-मन्तर-स्थाने महिला-मल्लाः श्रीसिंहस्य उपरि महिला-मल्लानां यौन शोषणस्य आरोपं कुर्वन्त्यः विरोध-प्रदर्शनम् अकुर्वन्। साक्षी-मलिक-बजरङ्ग-पुनिया-इत्याभ्यां सह विनेश फोगाट् अस्य षट्त्रिंशद्-दिनात्मकस्य आन्दोलनस्य प्रमुखा आसीत् ।

## सुभाषितम्

**आयतिं सर्वकार्याणां,**
**तदात्वं च विचारयेत्।**
**अतीतानां च सर्वेषां,**
**गुणदोषौ च तत्त्वतः॥**

भावार्थः- भविष्य में सभी कार्यों को करने से पूर्व तुम्हें अतीत में कृत ऐसे ही कार्यों के गुणों व दोषों के बारे में अच्छी तरह से विचार कर लेना चाहिए।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
असवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्




## पञ्च-लक्षाधिकैः जनैः भारते अङ्ग-दानस्य सङ्कल्पः गृहीतः

भारते पञ्च-लक्षाधिकैः जनैः अङ्ग-दानस्य सङ्कल्पः गृहीतः; अङ्ग-प्रत्यारोपण-सङ्ख्यायां भारतं विश्वे तृतीय-स्थानं भजते। भारत-देशेन त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे डिजिटल प्रतिज्ञा-मञ्चस्य आरम्भात् परं त्रिषु वर्षेषु पञ्च-लक्षाधिकाः आधार-सत्यापिताः अङ्गदान सङ्कल्पाः स्वायत्तीकृताः । नवदिल्ल्यां षोडश-भारतीय-अङ्गदान-दिवसावसरे भाषमाणा केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-राज्यमन्त्री अनुप्रिया पटेलः प्रावोचत् यत् गतेषु द्वादशवर्षेषु भारते अङ्ग-प्रत्यारोपाणां सङ्ख्या वर्धित्वा विंशति-सहस्राधिका संवृत्ता।

# संसदवार्ताः




## भारतीयसांख्यिकीसंस्थानविधेयकम् (2026)

सांख्यिकी-कार्यक्रमकार्यान्वयनमन्त्री राव इन्द्रजीत सिंहः 'भारतीयसांख्यिकीसंस्थानविधेयकम्, 2026' प्रस्तुतवान्। अस्य विधेयकस्य उद्देश्यं भारतीयसांख्यिकीसंस्थानाय एकं व्यापकं वैधानिकस्वरूपम् प्रदातुम् अस्ति, येन इदं सांख्यिकीविज्ञाने सम्बद्धक्षेत्रेषु च विश्वस्तरे मान्यताप्राप्तकेन्द्ररूपेण उत्कृष्टतां प्राप्नुयात्।

## बैंकर्स बुक्स एविडेंस विधेयकम् (2026)

वित्तमन्त्री निर्मला सीतारमण 'बैंकर्स बुक्स एविडेंस विधेयकम्, 2026' उपस्थापितवती। अस्य उद्देश्यं बैंकर्स-पुस्तकानां साक्ष्यैः सम्बद्धविधीनां निर्माणं तथा च तांसि समकालीन-डिजि-बैंकिंग-व्यवहारैः सह अनुकूलनं अस्ति।

## लोकसभायाः स्थगनम्

नीट-प्रकरणे छात्राणां विरोधप्रदर्शनकाले कथितायाः आरक्षकाणां कार्याचरणे विपक्षीयाः सदस्याः केन्द्रीयगृहमन्त्रिणः अमितशाहस्य उत्तरं प्रष्टुं सदनस्य मध्यभागम् आगच्छन्। पीठासीनाधिकारी सदस्यान् स्वस्थानेषु गन्तुम् अग्रहीत्। सः उक्तवान् यत् सदनस्यान्तः फलकानि ध्वजानि च आनेतुं शोभनं नास्ति, सदस्याः च संसदीयमर्यादायाः सम्मानं कुर्युः। कोलाहले निरन्तरं सति लोकसभायाः कार्यवाही मध्याह्ने द्विवादनपर्यन्तं स्थगिता अभवत्।

## राष्ट्रमण्डलक्रीडासु भारतीयक्रीडकानाम् उत्कृष्टप्रदर्शनम्

प्रातः 11 वादने लोकसभायाः कार्याचरणं प्रारब्धे सति अध्यक्षः ओम बिरला ग्लास्गो-नगरे आयोजिते 23तमे राष्ट्रमण्डलक्रीडामहोत्सवे उत्कृष्टप्रदर्शनं कृतवद्भ्यः क्रीडकेभ्यः वर्धापनानि अयच्छत्। सः उक्तवान् यत् आहत्य भारतीयक्रीडकाः उत्कृष्टं प्रदर्शनं कुर्वन्तः 13 स्वर्ण-, 17 रजत-, 9 कांस्यपदकैः सह आहत्य 39 पदकानि अर्जयन्, पदकतालिकायां च चतुर्थं स्थानं प्राप्तवन्तः। श्रीबिरला अवदत् यत् भारतस्य महिलाक्रीडिकाः असाधारणप्रतिभां क्षमतां च दर्शयन्त्यः अष्ट स्वर्णपदकानि, आहत्य 16 पदकानि च जिताः। एतत् उल्लेखनीयं प्रदर्शनं देशस्य लक्षशः युवकान् क्रीडकांश्च प्रेरयिष्यति।

## अहमदाबाद-नगरे आगामि-राष्ट्रमण्डलक्रीडाः

अध्यक्षः प्रोक्तवान् यत् राष्ट्रमण्डलक्रीडानाम् अग्रिमं संस्करणं 2030 वर्षे गुजरातस्य अहमदाबाद-नगरे आयोजितं भविष्यति। श्रीबिरला अवदत् यत् ह्यः सम्पन्नस्य समापनसमारोहस्य पश्चात् राष्ट्रमण्डलक्रीडानाम् आतिथेयत्वम् आधिकारिकरूपेण भारताय समर्पितम्।

## सदनस्य पुनः स्थगनम्

ततः परं श्रीबिरला प्रश्नकालस्य प्रारम्भं कर्तुं प्रायतत, किन्तु विपक्षीयाः सदस्याः छात्राणां विरोधप्रदर्शनकाले कथितायाःपुलिसदलस्य प्रतिक्रियायाः विषयं उत्थापितवन्तः। श्रीबिरला कैश्चित् विपक्षीयाङ्गैः स्वेच्छाकृत-विघ्नप्रति चिन्ताम् प्रकटितवान्। सः सर्वान् सदस्यान् स्वस्थानेषु प्रतिगन्तुं कार्यवाहीं च चालयितुं अनुमतिं दातुम् अग्रहीत्। उपद्रवे निरन्तरं सति अध्यक्षः सदनं मध्याह्ने 12 वादनपर्यन्तं स्थगितवान्।




## सूक्ष्म-लघु-मध्यम-उद्यम-विकास (संशोधन) विधेयकम् (2026):

राज्यसभा 'सूक्ष्म-लघु-मध्यम-उद्यम-विकास (संशोधन) विधेयकम्, 2026' पारितवती। अस्य विधेयकस्य उद्देश्यं सूक्ष्म-लघु-मध्यम-उद्यम-विकास-अधिनियम, 2006 मध्ये अधिकं संशोधनं करणम् अस्ति। अस्य लक्ष्यं धनावधाने (भुगताने) विलम्बस्य निवारणं विवादसमाधानस्य सरलीकरणं च अस्ति। विधेयके प्रावधानम् अस्ति यत् प्रत्येकं केन्द्रीय-सार्वजनिक-क्षेत्र-उद्यमेन लघु-मध्यम-उद्यमेभ्यः वस्तूनां सेवानां वा क्रयणाय सर्वेषां बिलानां निवारणं 'व्यापार-प्राप्य-अपकर्ष-प्रणाल्याः' (Trade Receivables Discounting System) माध्यमेन कर्तव्यम्। विधेयकानुसारं यदि विवादस्य स्थितौ मध्यस्थता विफला भवति, तर्हि मध्यस्थतायाः समाप्तेः तिथितः 30 दिनाभ्यन्तरे विवादानि मध्यस्थतायै (arbitration) प्रेषणीयानि। एतदपि उक्तं यत् पक्षाणां वक्तव्यानुवृत्तेः (pleadings) समाप्तेः तिथितः 90 दिनाभ्यन्तरे निर्णयः श्राष्टव्यः। विधेयके एतदपि प्रावधानम् अस्ति यत् यदि कश्चन विषयः षड्भ्यः मासेभ्यः अधिकं समयं यावत् लम्बितः अस्ति, तर्हि आपूर्तिकर्त्रे निर्धारितराशेः न्यूनतिन्यूनं 50 प्रतिशतं धनं दातव्यम्।

## सदनपुनःप्रारम्भः मन्त्रिणः वक्तव्यं च:

प्रथमस्थगनानन्तरं सदनस्य उपवेशने पुनः प्रारब्धे सति सूक्ष्म-लघु-मध्यम-उद्यममन्त्री जीतनराममांझी विधेयकं उपस्थापितवान्।

चर्चायाः उत्तरं ददत् श्रीमांझी अवदत् यत् सूक्ष्म-लघु-मध्यम-उद्यमक्षेत्राय प्रदत्ते अवशिष्टऋणे (बकाया ऋण) हालिकवर्षेषु महती वृद्धिः अभवत्। सः असूचयत् यत् 2014-15 वर्षे यत् ऋणं प्रायः 10 लक्षकोटिरूप्यकाणां आसीत्, तत् इदानीं वर्धित्वा 38 लक्षकोटिरूप्यकेभ्यः अधिकं जातम्। एतेन एतत् स्पष्टं भवति यत् एमएसएमई-क्षेत्राय दीयमानस्य ऋणस्य प्रवाहः निरन्तरं वर्धते।

## ऋण-गारण्टी-निधि-न्यासस्य भूमिका:

एमएसएमई-कृते ऋण-गारण्टी-निधि-न्यासस्य (Credit Guarantee Fund Trust) भूमिकां उल्लिखन् श्रीमांझी अवदत् यत् 2000 तः 2022 वर्षस्य मध्ये एमएसएमई-उद्यमेभ्यः दत्ता आहत्य ऋणगारण्टी प्रायः त्रि-लक्ष-चतुर्दश-सहस्र-कोटिरूप्यकाणि आसीत्। तथापि, गतेषु चतुर्षु वर्षेषु (2022-23 तः 2025-26 पर्यन्तम्) एषा राशिः वर्धित्वा 10 लक्ष-सप्तचत्वारिंशत्-सहस्र-कोटिरूप्यकेभ्यः अधिका जाता। श्रीमांझी अवदत् यत् सर्वकारः एमएसएमई-क्षेत्रस्य सुदृढीकरणाय, अस्य विकासक्षमतायाः वर्धनाय तथा च व्यापारविस्तारस्य प्रोत्साहनाय प्रतिबद्धः अस्ति।

## चर्चायां सांसदानां सहभागिता:

भाजपामत्याः सुमित्रा बाल्मीकिः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी महिलानाम्, अनुसूचितजातीनाम्, अनुसूचितजनजातीनाम्, उपेक्षितानां च जनानां कल्याणाय सशक्तिकरणाय च कार्यं कृतवान्। सा अवदत् यत् 2014 वर्षात् पूर्वं विकासः अधिकतरं कर्गदकार्येषु एव सीमितः आसीत्, किन्तु प्रधानमन्त्रिणः मोदिनः नेतृत्वे देशे महत्त्वपूर्णं परिवर्तनं दृष्टम्। सर्वकारस्य ध्यानं समाजे वास्तविकपरिवर्तनस्य आनेतौ, आत्मनिर्भरतायाः प्रोत्साहने, नागरिकाणां सशक्तिकरणे च अस्ति।

तृणमूलकाङ्ग्रेस्य डोला सेन अवदत् यत् सूक्ष्म-लघु-मध्यम-उद्यमाः देशस्य अर्थव्यवस्थायाः पृष्ठवंशः (मेरुदण्डः) सन्ति। केवलं निर्माणक्षेत्रमेव देशस्य सकल-घरेलू-उत्पादने (GDP) 17 प्रतिशतं योगदानं ददाति, एमएसएमई-उद्यमाः च देशस्य बेरोजगारीसमस्यायाः समाधानं कर्तुं शक्नुवन्ति। सा आरोपम् अकरोत् यत् सर्वकारः एमएसएमई-क्षेत्रस्य संरक्षणाय काञ्चिदपि पहिलं न करोति।

बीजेडी-दलस्य सन्तृप्तमिश्रः अवदत् यत् एमएसएमई-क्षेत्रं जीडीपी-मध्ये 36 प्रतिशतं योगदानं ददाति, प्रायः 30 कोटिजनेभ्यः रोजगारं च प्रयच्छति। सः चिन्तां प्राकटयत् यत् एमएसएमई-क्षेत्रस्य प्रायः 8 तः 10 लक्षकोटिरूप्यकाणां कोषः अवरुद्धः अस्ति। सः प्रतिभासीय-समाधानानां स्थाने ठोस-परिष्काराणां बलमदात्।

अन्यैः सह वाईएसआरसीपी-दलस्य गोल्ला बाबूरावः, एआईएडीएमके-दलस्य एम थम्बीदुरै, एनसीपी-दलस्य राजेन्द्रजैनः, टीडीपी-दलस्य मस्थानरावयादवबीधा, बीआरएस-दलस्य रविचन्द्रवद्दीराजु, यूपीपीएल-दलस्य प्रमोदबोरो, बसपा-दलस्य रामजी च चर्चायां भागम् अगृह्णन्। विधेयके पारिते सति राज्यसभा पूर्णदिनाय स्थगिता अभवत्।

## नवदिल्लीतः स्वदेशी-नेटवर्क-सर्वेक्षण-वाहनं (Network Survey Vehicle) प्रस्थापितम्



केन्द्रीय-सडक-अनुसन्धान-संस्थानेन (CSIR-CRRI) नवदिल्लीतः स्वदेशी-नेटवर्क-सर्वेक्षण-वाहनं (Network Survey Vehicle) प्रस्थापितम्। विज्ञान-प्रौद्योगिकी-मन्त्रालयानुसारम् एतत् वाहनं आधुनिकप्रविधिभिः सुसज्जितम् अस्ति। एतस्मिन् तीव्रगत्या मार्गपरीक्षणकारिणी लेजर-प्रविधिः, अल्ट्रा-एचडी-कैमराः, जीपीएस-प्रणाली, मार्गदोष-परिज्ञान-प्रणाली, एआई-आधारित-दत्त-विश्लेषणम् (AI-based data analytics) च इत्यादयः सुविधाः सन्ति। CSIR-CRRI-संस्थानस्य निदेशकः डॉ. सी. रविशेखरः अवदत् यत् एतत् वाहनं श्रेष्ठ-मार्गनिर्माणेषु साहाय्यं करिष्यति। मार्गाणां वैज्ञानिकपरीक्षणेन रक्षणव्ययः (maintenance cost) न्यूनः भविष्यति, नगरीय-परिवहन-व्यवस्थायाः सुधारीकरणे च साहाय्यं लप्स्यते।

# मेधाविभ्यः १६-१६ सहस्रं रूप्यकाणि प्राप्स्यन्ते, शिक्षकाणां रिक्तानि पदानि पूरयिष्यन्ते, युक्तीकरणं च भविष्यति

**हिमसंस्कृतवार्ताः- शिमला।** शिक्षा मन्त्रिणः रोहित ठाकुरस्य अध्यक्षतायां सोमवासरे शिक्षा-निदेशालये प्रदेशस्य विद्यालयेषु प्रचलन्तीनां विकासात्मक-कार्याणां, शैक्षणिक- गुणवत्तायाः, रिक्तपदानां, परीक्षा-परिणामानां तथा च विविधानां योजनानां प्रगतेः विस्तीर्णा समीक्षा- उपवेशनम् आयोजितम्। अस्मिन् उपवेशने शिक्षासचिवः, शिक्षानिदेशकः, अतिरिक्तनिदेशकः, समग्र-शिक्षा-परियोजनायाः परियोजनानिदेशकः, सर्वे मण्डल-उपनिदेशकाः, विभागस्य वरिष्ठ- अधिकारिणश्च उपस्थिताः आसन्। उपवेशने शिक्षामन्त्री आदेशं दत्तवान् यत् लोक-निर्माणविभागस्य माध्यमेन लम्बितानां विद्यालय-निर्माणकार्याणां विस्तीर्णसमीक्षायै शीघ्रमेव लोक-निर्माणविभागस्य सचिवेन सह सम्बद्धाधिकारिणां पृथक् उपवेशनम् आयोजितं भविष्यति। सः अकथयत् यत् येषां विद्यालयानां निर्माण-कार्यं स्वीकृत्य अपि आरब्धं नाभवत्, तेषां विस्तीर्णा स्थिति-विज्ञप्तिः सर्वे मण्डल-उपनिदेशकाः शीघ्रं प्रच्छेदयन्तु। सः स्पष्टमकरोत् यत् आगामिमासे पुनः समीक्षा-उपवेशनम् आयोजित्य प्रत्येक- मण्डले विकासकार्याणां प्रगतेः समीक्षा करिष्यते, सम्बद्धाधिकारिणाम् उत्तरदायित्वं च निश्चितं करिष्यते।

पञ्च-लक्ष-रूप्यकाणि यावत् नागरिककार्याणि एसएमसी कारयितुं शक्ष्यति। उपवेशने निर्णयः गृहीतः यत् पञ्च-लक्षरूप्यकाणि यावत् नागरिककार्याणि विद्यालय- प्रबन्धन- समितयः स्वस्तरे कारयितुं शक्ष्यन्ति, येन लघूनां विकास-कार्याणां गतिः वर्धेत। शिक्षामन्त्रिणा सूचितं यत् 'श्रीनिवास- रामानुजन्-छात्र- डिजिटल- योजना' इति अस्याः अन्दर्गते आहत्य ९,३५९ छात्र-लाभार्थिनः सन्ति। एतेषु षट्-मण्डलानां ३,०८९ छात्राणां बैंक-खातेषु प्रति-छात्रं १६ सहस्रं रूप्यकाणि प्रत्यक्ष-लाभ-अन्तरण माध्यमेन प्रेषितानि सन्ति, यदा तु अवशिष्टानां ६,२७० छात्राणां खातेषु एषा राशिः अगस्तमासस्य १५ दिनाङ्कात् पूर्वं हस्तान्तरिता भविष्यति।

## शिक्षायाः गुणवत्तायाः सुधाराय

### प्रभावकारिणी कार्ययोजना सज्जीभविष्यति

सः आदिशत् यत् येषां विद्यालयानां परीक्षापरिणामः २५ प्रतिशततः न्यूनः अस्ति, तत्र सम्बद्धाः मण्डल-उपनिदेशकाः स्वयं निरीक्षणं करिष्यन्ति तथा च शिक्षायाः गुणवत्तां वर्धयितुं प्रभावकारिणीं कार्ययोजनां रचयिष्यन्ति। वर्षे २०२५-२६ तमे मन्द-परीक्षा-परिणामयुक्तेषु १२३ प्रकरणेषु विभागीय-कार्रवाई प्रचलन्ती अस्ति, एतादृशेषु प्रकरणेषु इदानीं मण्डल-उपनिदेशकैः अपि स्व-परामर्शाः दातव्याः भविष्यन्ति। रोहित ठाकुरः अकथयत् यत् दुर्गमेषु जनजातीय- क्षेत्रेषु च शिक्षकाणां रिक्तानि पदानि पूरयितुं विशेषप्रस्तावः सज्जीकरिष्यते, यथा सुदूरक्षेत्रेषु शिक्षण-व्यवस्था प्रभाविता न भवेत्। सः असूचयत् यत् ५७६ शिक्षकाणां पदानां पूरण-प्रक्रिया प्रचलन्ती अस्ति, येषु शारीरिक-शिक्षा, टीजीटी- आर्ट्स, टीजीटी-नॉन-मेडिकल, टीजीटी-मेडिकल इति एतानि पदानि समाविष्टानि सन्ति। उपवेशने विभागीय-पदोन्नति-प्रकरणानां समीक्षां कुर्वन् शिक्षामन्त्री शिक्षानिदेशकम् आदिशत् यत् सर्वाः लम्बिताः पदोन्नति-प्रक्रियाः शीघ्रं पूर्णायेरन् तथा च पात्राणाम् अधिकारिणां कर्मचारिणां च प्रकरणानां समयबद्ध-निष्पत्तिः निश्चिता भवेत्।



## लम्बितानां कार्याणां तीव्रीकरणाय आदिशत्-

सः विद्यालयेषु रोजगारोन्मुख-शिक्षायाः प्रवर्धनाय कौशल-आधारित-विषयाणां पाठ्यक्रमविकल्पानां च नव-विकल्पानां विकासार्थम् अपि निर्देशम् अयच्छत्। अस्मिन् सन्दर्भे शिक्षाविभागः विस्तीर्णां कार्ययोजनां सज्जीकरिष्यति। विकासात्मक- कार्याणां समीक्षा-काले सूचितं यत् 'समग्र-शिक्षा' तथा च 'पीडीएनए' (PDNA) इत्यस्य अन्दर्गते वर्षे २०२३-२४ तः २०२५-२६ पर्यन्तं ८२.३७ कोटि-रूप्यकाणि निर्गतानि सन्ति। एतेषु ५८० कार्याणि पूर्णानि अभवन्, यदा तु २८५ कार्याणि प्रगतौ सन्ति, १५२ कार्याणि च अद्यापि आरब्धानि न सन्ति। शिक्षामन्त्री सर्वान् लम्बितान् कार्यप्रकल्पान् शीघ्रं पूर्णं कर्तुं सम्बद्धसंस्थानां नियमितसमीक्षायाः निर्देशं दत्तवान्।

## गैर-बोर्डकक्षाणां परीक्षाः दिसम्बरमासे प्रायोजयितुं बलम्

समेजक्षेत्रे आपदा-क्षतिग्रस्तस्य विद्यालयस्य निर्माणकार्ये विलम्बं दृष्ट्वा शिक्षामन्त्री असन्तोषं प्रकटितवान्, सम्बद्धान् अधिकारिणः च त्रिभिः दिनैः अन्तः संयुक्तनिरीक्षणं कृत्वा निर्माणकार्यं प्रारब्धं कर्तुम् आदिशत्। सः अकथयत् यत् धनराशौ उपलब्धायां सत्यामपि कस्मिंश्चिद् निर्माणकार्ये अकारणविलम्बः न सहिष्यते। उपवेशने एतदपि गृहीतं यत् वर्षे २०२७ तः दशम-द्वादश-बोर्ड-कक्षाः विहाय अन्यासां कक्षाणां वार्षिकपरीक्षा दिसम्बर-मासे आयोजयितुं यत्नः करिष्यते, तदनुसारं शैक्षणिकसत्रं जनवरीमासात् प्रारब्धं कर्तुं कार्ययोजना सज्जीकरिष्यते।

## ७३८ भवनानां अन्यविभागेभ्यः शीघ्र-हस्तान्तरणं निश्चितं कर्तुं निर्देशः

निरस्तीकृतानां विलीनीकृतानां च विद्यालयानां भवनानां समीक्षां कुर्वन् शिक्षामन्त्री अवशिष्टानां ७३८ भवनानां अन्य-विभागेभ्यः शीघ्र-हस्तान्तरणं निश्चितं कर्तुम् आदिशत्। अनेन सह एतादृशानां विद्यालयानाम् अव्ययराशिं विलीनविद्यालयेषु स्थानान्तरितं कर्तुम् अपि अकथयत्। उपवेशने विद्यालय- निरीक्षण- प्रणालीं प्रबलां कर्तुं उपनिदेशकेभ्यः 'ऑनलाइन'-निरीक्षण-सुविधां प्रदातुं, भौतिक-निरीक्षण-काले चित्र-चलच्चित्र- आधारित-वृत्तान्तम् अनिवार्यरूपेण शिक्षा-निदेशालयम् प्रति प्रेषयितुं निर्देशः दत्तः।

## शिक्षकाणां युक्तीकरणे चर्चा

शिक्षकाणां युक्तीकरणे चर्चां कुर्वन् निर्णयः गृहीतः यत् येषु प्राथमिक-विद्यालयेषु छात्राणां सङ्ख्या न्यूना शिक्षकाणां सङ्ख्या च अधिका अस्ति, ततः अतिरिक्ताः शिक्षकाः एकल-शिक्षक-युक्तेषु अथवा रिक्तपदयुक्तेषु विद्यालयेषु स्थानान्तरिताः भविष्यन्ति। क्रीडा-गतिविधिभ्यः प्रोत्साहनं दातुं 'समग्रशिक्षा' इत्यस्याः अन्दर्गते प्राप्तात् १३ कोटि-रूप्यकाणां निधीतः 'रिवॉल्विंग-फण्ड' स्थापयितुं निर्णयः गृहीतः। अनेन सह अनुपयुक्तानां क्रीडा-सामग्रीणां क्रीडा-कोषस्य च आवश्यकतायुक्तेषु विद्यालयेषु पुनः वितरणं करिष्यते।

## विभागस्य 'स्पोर्ट्स-वेब-पोर्टल' इत्यस्य शुभारम्भः

उपवेशनस्य समये शिक्षा-विभागस्य आधुनिकस्य 'स्पोर्ट्स-वेब-पोर्टल' इत्यस्य शुभारम्भः अपि कृतः। अस्य पोर्टलस्य माध्यमेन क्रीडा- प्रतियोगितानां, स्पोर्ट्स-छात्रावासानां, क्रीडकानां डिजिटल-दत्तांश-सञ्चयस्य, ऑनलाइन- प्रमाणपत्राणां, जीवन्त-प्रसारणस्य तथा च क्रीडा- गतिविधीनां प्रत्यक्ष-निरीक्षणस्य सुविधा उपलब्धा भविष्यति। उपवेशने विभागीय- अनुशासनात्मक- प्रकरणानां अपि समीक्षा कृता। शिक्षा-मन्त्री स्पष्टीकृतवान् यत् छात्राणां सुरक्षया, वित्तीय- पारदर्शितया, प्रशासनिक-अनुशासनेन सम्बद्धेषु प्रकरणेषु काऽपि असावधायिता न सहिष्यते, दोषी-अधिकारिणां कर्मचारिणां च विरुद्धं नियमानुसारं कठोरकार्यवाही निरन्तरं भविष्यति।

## शालेय-क्रीडाभ्यः 'डिजिटल' उड्डयनम्,

### एसएसए इत्यस्य नूतन- जालस्थलस्य विमोचनम्

प्रदेशस्य शिक्षामन्त्री रोहितठाकुरः सोमवासरे 'हिमाचल-स्कूल- स्पोर्ट्स- एसोसिएशन' इत्यस्याः आधिकारिक-जालस्थलस्य, 'वेबपोर्टल' www.hssa.co.in इत्यस्य च शुभारम्भम् अकरोत्। अस्याः पहलस्याः उद्देश्यं प्रदेशस्य शालेय-क्रीडाणां डिजिटलीकरणं वर्तते। मन्त्री रोहित ठाकुरः अकथयत् यत् एतत् डिजिटल-मञ्चं शालेय-क्रीडा-प्रतियोगिताः अधिकाः पारदर्शिकाः, प्रभावकारिण्यः, प्रविधि-आधारिताः च करिष्यति। सः असूचयत् यत् क्रीडकाः, शिक्षकाः, अधिकारिणः, सामान्यनागरिकाः सर्वाम् आवश्यकीं सूचनाम् एकेनैव मञ्चेन सुलभतया प्राप्स्यन्ति।

अस्मिन् अवसरे शिक्षासचिवः राकेश कँवरः, राज्य-परियोजना- निदेशकः राजेशशर्मा, स्कूल- शिक्षा-निदेशकः आशीष कोहली च उपस्थिताः आसन्। एतत् आधुनिकं वेब-पोर्टलम् शालेय- क्रीडा- गतिविधीनां सुचारु-सञ्चालनाय विकसितं कृतम् अस्ति। अस्य माध्यमेन क्रीडा- प्रतियोगिताभिः सम्बद्धाः सर्वाः सेवाः एकेनैव डिजिटलमञ्चे उपलब्धाः सन्ति। पोर्टले क्रीडकानां, विद्यालयानां प्रतियोगितानां च केन्द्रीकृतं डिजिटल- दत्तांशसञ्चयं समाविष्टं वर्तते।

अनेन कागजी-कार्ये महती न्यूनता आगमिष्यति। एतत् पोर्टलम् विद्यालयानां क्रीडकानां च 'ऑनलाइन'-पञ्जीकरणस्य सुविधां ददाति। अस्मिन् प्रतियोगितानां ऑनलाइन-प्रबन्धनं, स्पर्धा- कार्यक्रमः, समय-सारणी, परिणामाः तथा च अङ्कतालिका समाविष्टा अस्ति। नवीनाः समाचाराः, सूचनाः, महत्वः घोषणाः च झटिति प्रकाशिताः भविष्यन्ति। एतत् पूर्णतः कागजरहितं डिजिटल- प्रशासनिकव्यवस्थां निश्चेष्यति। सहभागिता-योग्यता- विजेतृ- उपलब्धि- प्रमाणपत्राणां क्यूआर-कोड आधारितं ऑनलाइननिर्माणं सत्यापनम् अपि सम्भवम् अस्ति। एचएसएसए जालस्थलस्य 'फ्रंटएंड' विकासः राजकीय- वरिष्ठ- माध्यमिक- विद्यालयस्य, ढली (शिमला) इत्यस्य सूचना-प्रविधि-सक्षम-सेवा सङ्घास्य व्यावसायिक-छात्रैः कृतः। वेब-पोर्टलस्य 'बैक एंड' विकासः तथा च प्राविधिक-संरचनायाः निर्माणं व्यावसायिकप्रशिक्षकः प्रवीण मेघटा अकरोत्।

# हिमाचलस्य राज्यपालः करिष्यति औद्योगिक-क्षेत्र-काला-अम्बस्य प्रवासम्, लघु-उद्योग-भारत्या आमन्त्रितः



**हिमसंस्कृतवार्ताः** — हिमाचले तीव्रगत्या उदीयमानस्य सिरमौर-मण्डलस्य औद्योगिक-क्षेत्रस्य 'कालाअम्ब'-इत्यस्य 'लघु-उद्योग-भारती-कालाअम्ब'-इकाई-अध्यक्षस्य युवा-उद्योगपतेः अखिलमहेश्वरी-वर्यस्य नेतृत्वे उद्योगपतीनां एकेन प्रतिनिधि-मण्डलेन हिमाचलप्रदेशस्य राजपालः कवीन्द्रगुप्तेन सह शिष्टाचार-मेलनम् कृतम्। अस्मिन् अवसरे प्रतिनिधि-मण्डलेन तस्मै सफलस्य जनकल्याणकारिणः कार्यकालस्य मङ्गलकामनाः प्रेषिताः। गोष्ठ्याः अन्तरे प्रतिनिधि-मण्डलेन कालाअम्ब-औद्योगिक-क्षेत्रस्य विकासाय, उद्योगैः सम्बद्धान् विविध-विषयान् क्षेत्रस्य प्रमुखाः समस्याः च आदाय राज्यपालः विस्तारेण ज्ञापितः। साकमेव तस्मै कालाअम्ब-औद्योगिक-क्षेत्रस्य प्रवासं कर्तुं तत्रत्यानां वास्तविकीनां स्थितीनां च अवलोकनं कर्तुं सादरम् आमन्त्रणं दत्तम्।

राज्यपालः प्रतिनिधि-मण्डलाय सकारात्मकम् आश्वासनं यच्छन् अवदत् यत् सः समयं निष्कास्य शीघ्रमेव कालाअम्ब-औद्योगिक-क्षेत्रस्य भ्रमणं करिष्यति उद्योगैश्च सम्बद्धेषु विषयेषु आवश्यक-सहयोगं प्रदातुं सर्वसम्भव-प्रयासं करिष्यति। प्रतिनिधि-मण्डलेन प्रोक्तं यत् राज्यपालस्य अतीव सरलं, सौम्यं, आत्मीयं व्यावहारिकञ्च व्यक्तित्वं सर्वेषां हृदयं स्पृष्टवान्। तस्य नम्रता, सहजता सर्वेषां वचनानि च गम्भीरतया श्रवणस्य भावना प्रतिनिधि-मण्डले गहरां सकारात्मकं च प्रभावम् अत्यजत्। तेन सह संजातं तत् आत्मीयं मेलनं सर्वदा स्मरणीयं स्थास्यति। राजपालेन सह शिष्टाचार-मेलनात् परं 'लघु-उद्योग-भारती-कालाअम्ब'-इकाई-अध्यक्षस्य अखिलमहेश्वरी-वर्यस्य नेतृत्वे प्रतिनिधि-मण्डलेन उद्योग-मन्त्री हर्षवर्धनचौहानेन सह अपि शिष्टाचार-मेलनं कृतम्। अस्मिन् अन्तरे प्रतिनिधि-मण्डलेन कालाअम्ब-त्रिलोकपुर-मार्गस्य जर्जर-स्थितिं तथा च 'ई.एस.आई.-चिकित्सालय'-मार्गस्य समस्याः प्रमुखतया उद्योग-मन्त्रिणः सम्मुखं स्थापिताः। तस्मै ज्ञापितं यत् एतयोः द्वयोः मार्गयोः दुष्ट-स्थितेः कारणेन उद्योगेभ्यः, कर्मचारिभ्यः, स्थानीय-निवासिभ्यः प्रतिदिनम् आगच्छद्भ्यः गच्छद्भ्यः च सहस्रशः जनेभ्यः महत्याः असुविधायाः सम्मुखीकरणं कर्तव्यं भवति। उद्योग-मन्त्री हर्षवर्धनचौहानः प्रतिनिधि-मण्डलस्य वचनानि गम्भीरतया अशृणोत् आश्वासनं च अददात् यत् कालाअम्ब-त्रिलोकपुर-मार्गस्य निर्माणं परिष्कार-कार्यं च अतीव शीघ्रमेव प्रारप्स्यते, साकमेव तेन 'ई.एस.आई.'-चिकित्सालय-मार्गस्य कार्यम् अपि प्राथमिकता-आधारेण शीघ्रं कारयितुम् आश्वासनं दत्तम्। प्रतिनिधि-मण्डलेन उक्तं यत् एतयोः द्वयोः मार्गयोः निर्माणं परिष्कारश्च सम्पूर्णस्य औद्योगिक-क्षेत्रस्य कृते अत्यन्तं महत्त्वपूर्णम् अस्ति। अनेन उद्योगानां 'लॉजिस्टिक्स'-व्यवस्था श्रेष्ठा भविष्यति, कर्मचारिणां गमनागमनं सुगमं भविष्यति स्थानीय-व्यापाराय सामान्य-जनेभ्यः च महती साहाय्यता (राहत) लप्स्यते। अध्यक्ष-अखिलमहेश्वरी-सहितं प्रतिनिधि-मण्डलेन विश्वासः प्रकटितः यत् उद्योग-मन्त्रिणः मार्गदर्शनेन सहयोगेन च एतेषां महत्त्वपूर्ण-विकास-कार्याणां प्रारम्भः शीघ्रमेव भविष्यति कालाअम्ब-औद्योगिक-क्षेत्रस्य विकासाय च नूतना गतिः लप्स्यते।

# राजनीतिक-प्रभावे पञ्जीकृता एफ.आई.आर., सुधीरशर्मणा निरस्ताः आय-अधिक-सम्पत्तेः आरोपाः



**हिमसंस्कृतवार्ता — धर्मशालाः।** धर्मशाला-विधानसभा-क्षेत्रस्य विधायकः सुधीरशर्मा राज्य-सतर्कता-भष्टाचार-निरोधक-ब्यूरो-संस्थया स्वस्य विरुद्धं पञ्जीकृतायाम् एफ.आई.आर.-मध्ये आरोपितान् सर्वान् आरोपान् मूलात् निरस्य तान् पूर्णतः निराधारान्, असत्यान्, दुर्भावनापूर्णान् राजनीतिक-प्रतिशोधेन प्रेरितांश्च प्रोक्तवान्। सुधीरशर्मणः कथनम् अस्ति यत् एषा एफ.आई.आर. तथ्यैः नियमैः च आधारिता न, अपितु राजनीतिक-प्रभावे पञ्जीकृता अस्ति। तस्य आरोपः अस्ति यत् राज्यस्य वर्तमान-सर्वकारस्य माननीय-मुख्यमन्त्रिणः च प्रभावे विजिलेंस-ब्यूरो-संस्थायाः दुरुपयोगं कृत्वा तं राजनीतिक-रूपेण प्रताडयितुं तस्य सार्वजनिक-छविं मलिनयितुं च प्रयासः कृतः अस्ति। तस्य अनुसारं एतत् सम्पूर्णं प्रकरणं राजनीतिक-प्रतिशोधस्य एकं स्पष्टम् उदाहरणम् अस्ति, यस्य उद्देश्यं एकं राजनीतिक-प्रतिद्वन्द्विनं कलङ्कयितुम् अस्ति। श्रीशर्मा अवदत् यत् तेन स्वकीये सार्वजनिक-जीवने वैयक्तिक-वित्तीय-विषयेषु च सर्वदा पूर्ण-पारदर्शिता पालिता। तस्य आयस्य, सम्पत्तीनां वित्तीय-आदानप्रदानस्य च समुचितं विवरणं समय-समये आयकर-विभागाय, भारत-निर्वाचन-आयोगाय अन्येभ्यः च सक्षमेभ्यः वैधानिक-प्राधिकारिभ्यः सम्मुखं नियमानुकूलं प्रस्तुतं क्रियमाणम् आसीत्।तेन उक्तं यत् कस्यापि एफ.आई.आर.-पञ्जीकरणं केवलम् अन्वेषणस्य प्रारम्भः अस्ति, एतत् कस्यापि प्रकारेण दोष-सिद्धेः प्रमाणं न मन्तुं शक्यते। तस्य विरुद्धं आरोपितानां प्रत्येक-आरोपाणां विधिसम्मतं तथ्यात्मकं च उत्तरम् उपलब्धम् अस्ति तथा च तस्य प्रत्येक-सम्पत्तेः वित्तीय-आदानप्रदानय च वैधं सत्यापितं च स्रोतम् अस्ति। तस्य पूर्णः विश्वासः अस्ति यत् निष्पक्ष-अन्वेषणेन न्यायिक-प्रक्रियया च सत्यं सम्मुखम् आगमिष्यति तस्य निष्पापत्वं च सिद्धं भविष्यति। श्रीशर्मा एतदपि अवदत् यत् एफ.आई.आर.-मध्ये कृताः निष्कर्षाः अनुमानेषु, अस्थायी-आकलनेषु अपूर्ण-सूचनासु च आधारिताः सन्ति। अतः सः अस्याः सम्पूर्ण-कार्याचरिणायाः वैधानिकतां औचित्यं च सक्षम-न्यायालयस्य सम्मुखं सङ्कटयिष्यति (चुनौती दास्यति) स्वकीयानां सर्वेषां संवैधानिक-वैधानिक-अधिकाराणां प्रयोगं करिष्यति च।

तेन स्पष्टीकृतं यत् स्वकीय-वैधानिक-संवैधानिक-अधिकाराणां रक्षणाय न्यायालयस्य शरण-ग्रहणं प्रत्येक-नागरिकस्य अधिकारः अस्ति एतत् च कस्यापि प्रकारेण अन्वेषणे बाधा-उत्पादनस्य रूपेण प्रस्तुतीकरणम् अनुचितं भ्रामकं च अस्ति। श्रीसुधीरशर्मा अवदत् यत् तस्य भारतीय-संविधाने, न्यायपालिकायाः स्वतन्त्रतायां नियमस्य शासने च पूर्णः विश्वासः अस्ति। सः नियमानुकूलम् प्रत्येक-अन्वेषणे सहयोगं करिष्यति, साकमेव स्वकीय-प्रतिष्ठायाः अधिकाराणां च रक्षणाय सर्वान् उपलब्धान् कानूनी-उपायान् स्वीकरिष्यति। तस्य पूर्णः विश्वासः अस्ति यत् अन्ते सत्यस्य एव विजयः भविष्यति सः च सर्वेभ्यः आरोपेभ्यः पूर्णतः निर्दोषः सिद्धः भविष्यति।

# राजमार्ग-पार्श्वे निर्माणे कठोरतायाः सज्जीकरणम्, संवेदनशील-क्षेत्रेषु न निर्मास्यन्ते गृहाणि




**हिमसंस्कृतवार्ताः- शिमला।** राज्यसर्वकारः हिमाचले अनियोजित-निर्माणस्य नियन्त्रणाय नूतनां नीतिं प्रवर्तयितुं सज्जीकरणं करोति। प्रस्तावस्य अन्तर्गतं राष्ट्रिय-राजमार्गाणां 'फोरलेन'-मार्गाणां च उभयोः पार्श्वयोः ५० तः १०० मीटरमितं यावत् क्षेत्रं नियोजनक्षेत्रम् (प्लानिंग- एरिया) इति घोषितं करिष्यते, यत्र भवन-निर्माणं निर्धारित- मानदण्डानाम् अनुसारमेव भवितुं शक्ष्यते। तत्रैव भूस्खलन-प्लावन (बाढ़) प्राकृतिक- जल- निकासमार्ग- प्राचीन- 'डम्पिंग- साइट' सदृशानि संवेदनशीलक्षेत्राणि निर्माण- निषिद्ध- क्षेत्रम् ('नो-कन्स्ट्रक्शन-जोन') इति रचयिष्यन्ते। सर्वकारेण शिमलायाः जाखू-पर्वतस्य (जाखू हिल्स) तत्समीपस्थानां संवेदनशीलानां क्षेत्राणां विशेषसंरक्षणं दातुम् अपि निर्णयः गृहीतम्।

नगर-ग्राम-नियोजनमन्त्री राजेशधर्माणी सोमवासरे सचिवालये पत्रकारैः सह सम्भाषण-काले ज्ञापितवान् यत् सर्वकारस्य इच्छा विकासस्य रोधनं न, अपितु जनानां जीवनस्य धनस्य च सुरक्षां पर्यावरणसंरक्षणं च निश्चितं करणम् अस्ति। मार्गेण सह संश्लिष्य जायमाने निर्माणे रोधे सति दुर्घटनानां सङ्कटः न्यूनः भविष्यति। 'सीवरेज' पेयजल- विद्युत्- 'ड्रेनेज'- सदृशीनां सुविधानां विकासः सुकरः भविष्यति। ग्राम-पञ्चायताः अपि सङ्कटपूर्णक्षेत्राणां अन्वेषणे सम्मेलिष्यन्ते। याः वैयक्तिक-भूमयः 'नो-कन्स्ट्रक्शन-जोन' मध्ये सम्मेलिष्यन्ते, तासाम् कृते सर्वकारः 'सर्कल-रेट' आधारेण भूमिक्रयणस्य पारदर्शिनम् विकल्पं प्रदातुं सज्जीकरणं करोति।

# तेलङ्गनायाः हैदराबादस्थले ब्रिक्स एक्सपर्ट नेटवर्क इत्यस्य द्वितीयं उपवेशनम्

तेलङ्गनायाः हैदराबादस्थले ब्रिक्स-भ्रष्टाचार-विरोधि-कार्यदलस्य सहैव सम्पत्ति-पुनर्प्राप्तेः ब्रिक्स एक्सपर्ट नेटवर्क इत्यस्य द्वितीयं उपवेशनं प्रारप्स्यत। अस्य द्विदिवसीयोपवेशनसस्य आयोजनं स्थैर्याय, नवोन्मेषाय, सहयोगाय, निरन्तरतायै च निर्माणम् इति विषयमाधारीकृत्य क्रियते। अस्मिन कार्यक्रमे ब्रिक्स-सदस्य-देशेभ्यः वरिष्ठ-नीति-निर्मातारः, विशारदाः, व्यावहारिक-विशेषज्ञाः, सहैव भ्रष्टाचार विरोधि-विधि-प्रवर्तन अभिकरणानां प्रतिनिधयः अपि भागं ग्रहीष्यन्ति ।

# माननीयकुलपतिमहोदयस्य आचार्यप्रह्लादरा.जोशिवर्यस्य सफलचतुर्वर्षसम्पूर्त्याः पञ्चमवर्षारम्भस्य च शुभावसरे सादरमभिनन्दनम्

हिमसंस्कृतवार्ता। "यथा राजा तथा प्रजा" इति लोकोक्तिः शिक्षासंस्थास्वपि सम्यगुपपद्यते। यस्य नेतृत्वं दूरदर्शि-न्यायनिष्ठ-कर्मठं च भवति, तस्य संस्थायाः सर्वतोमुखी उन्नतिः स्वाभाविकतया भवति।अस्माकं कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य माननीय-कुलपतिमहोदयः तादृशस्य आदर्शनेतृत्वस्य मूर्तिमानुदाहरणस्वरूपः वर्तते।

तस्य यशस्विनः चतुर्वार्षिककार्यकालस्य पूर्णतायामिदं सम्पूर्णविश्वविद्यालयपरिवारस्य पक्षतः हार्दिकमभिनन्दनं कृतज्ञताञ्च समर्पयामः।एतेषु चतुर्षु वर्षेषु विश्वविद्यालयस्य शैक्षणिक- प्रशासनिक-सांस्कृतिक- तथा आधारभूतसंरचनात्मकविकासः अभूतपूर्वतया सम्पन्नः। तेषां प्रबुद्धनेतृत्वेन विश्वविद्यालयः न केवलम् असमराज्ये, अपितु समग्रभारते संस्कृतशिक्षायाः प्रमुखकेन्द्रत्वेन स्वकीयां विशिष्टां प्रतिष्ठां सुदृढीकृतवान्।यदा भवता कुलपतिपदस्य दायित्वं स्वीकृतम्, तदा विश्वविद्यालये संस्कृताध्ययनार्थं मुख्यतया साहित्य-सर्वदर्शन-वेदाध्ययनविभागाः एव आसन्। संस्कृत-भारतीयज्ञानपरम्परायाः संरक्षणाय, संवर्धनाय, प्रसाराय च भवता न्याय-मीमांसा-धर्मशास्त्र-पुराणेतिहास-योगविज्ञान-प्रभृतीनां नवीनविभागानां स्थापना कृता तथा तेषु स्थायिशिक्षकाणां नियुक्तिरपि सम्पन्ना। एतत् भवतः दूरदर्शिनः नेतृत्वस्य शैक्षणिकप्रतिबद्धतायाश्च उज्ज्वलं प्रमाणम्।

समकालीनशिक्षायाः आवश्यकतामवलोक्य भवता सङ्गणकविज्ञानाध्यापनस्य प्रारम्भः कृतः तथा सङ्गणकविज्ञानविषये योग्याध्यापकस्य नियुक्तिरपि कृता। एतेन संस्कृतशिक्षया सह आधुनिकविज्ञानस्य समुचितः समन्वयः साधितः, विद्यार्थिनश्च आधुनिकसङ्गणकप्रौद्योगिकी-ज्ञानसम्पन्नाः अभवन्।

"शरीरमाद्यं खलु धर्मसाधनम्" इति महनीयभावनया प्रेरितेन भवता शारीरिकशिक्षाविषये सहायकाचार्यस्य नियुक्तिः कृता। तस्य फलस्वरूपं विश्वविद्यालयः क्रीडाक्षेत्रे विशिष्टां ख्यातिं सम्प्राप्तवान्। तथैव संगीतकलायाः संरक्षणसंवर्धनार्थं संगीतविषये शिक्षिकायाः नियुक्तिः कृता, येन विश्वविद्यालयस्य सांस्कृतिकपरम्परा अधिकसमृद्धा अभवत्।

भवतः कार्यकाले सुशासनस्य, पारदर्शितायाः, कार्यदक्षतायाः, उत्तरदायित्वबोधस्य च उत्कृष्टा परम्परा प्रतिष्ठापिता। "सर्वेषां सहयोगः सर्वेषां विकासः" इत्यस्य आदर्शस्य साकाररूपं भवतः प्रशासनमेव। छात्र-शिक्षककर्मचारिणां हितार्थं भवता बहव ऐतिहासिकनिर्णयाः स्वीकृताः। विशेषतया आचार्यपदे नियुक्तयः, पदोन्नतयः तथा शिक्षकेभ्यः सेवानिवृत्तेः आयुः षष्टिवर्षेभ्यः पञ्चषष्टिवर्षपर्यन्तं वर्धयितुमिति प्रयासः निर्णयश्च विश्वविद्यालयस्य इतिहासे स्वर्णाक्षरैः लेखनीयः भविष्यति।



भवतः महत्प्रयत्नैः विश्वविद्यालयपरिसरस्य दीर्घकालप्रचलिता पेयजलसमस्या सम्यक् समाधानमार्गं प्राप्तवती। असमराज्यसर्वकारस्य सहयोगेन द्वितीयछात्रावासनिर्माणकार्यं प्रारब्धम्। एतेन विद्यार्थिनां सुविधाः सम्यगभिवृद्धिं प्राप्ताः।

भवतः नेतृत्वस्य सर्वाधिकं महत्त्वपूर्णं वैशिष्ट्यमिदं यत् अल्पे एव काले विश्वविद्यालये विद्यार्थिनां संख्या प्रायः द्विगुणिता अभवत्। एषा वृद्धिः विश्वविद्यालयस्य वर्धमानप्रतिष्ठायाः, गुणवत्तापूर्णशिक्षायाः, समाजस्य दृढविश्वासस्य च प्रत्यक्षं प्रमाणम्।

माननीयकुलपतिमहोदयः केवलं कुशलः प्रशासकः न, अपितु विद्यार्थिनाम्, शिक्षकाणाम्, कर्मचारिणां च सर्वेषां हितचिन्तकः, मार्गदर्शकः, प्रेरणास्रोतश्च अस्ति। तेषां सरलता, विनयः, न्यायप्रियता, समदृष्टिः, मानवतामूलकव्यवहारश्च सम्पूर्णविश्वविद्यालयपरिवारस्य हृदयेषु विशिष्टं स्थानं प्राप्तवान्।

भारतीयज्ञानपरम्परायाः संरक्षणे, संस्कृतभाषायाः संवर्धने, आधुनिकशिक्षायाः समन्वये, अनुसन्धानप्रोत्साहने, छात्रहितसंरक्षणे तथा प्रशासनिकदक्षतायां भवतः योगदानम् अमूल्यमेव। तस्य नेतृत्वे विश्वविद्यालयः न केवलं प्रादेशिकस्तरे, अपितु राष्ट्रिय-अन्ताराष्ट्रीयस्तरेऽपि स्वकीयां विशिष्टां प्रतिष्ठां सुदृढीकृतवान्।

वयं सर्वे प्रार्थयामहे यत् परमेश्वरः माननीयकुलपतिमहोदयाय दीर्घमायुः, निरामयस्वास्थ्यं, अक्षयामूर्जां, निरन्तरयशश्च प्रददातु। तेषां अवशिष्टकार्यकालेऽपि विश्वविद्यालयः नूतनान् कीर्तिमानः स्थापयित्वा भारतीयज्ञानपरम्परायाः विश्वप्रसिद्धं केन्द्रं भूयादिति मङ्गलकामनाः।पुनरपि माननीयकुलपतिमहोदयाय हार्दिकमभिनन्दनम्। भवतः यशसा विश्वविद्यालयस्य यशोऽपि निरन्तरं वर्धताम्। भवतः प्रेरणादायिनिनेतृत्वे वयं सर्वे गौरवान्विताः स्मः।

# 'सेन्ट्रल मोटर व्हीकल नियम, 1989' मध्ये संशोधनस्य प्रारूपे द्विचक्र-मार्ग-एम्बुलेंस तथा V2V संचारप्रणाल्याः समावेशः

सडकमार्ग-परिवहन-राजमार्ग-मन्त्रालयेन 'सेन्ट्रल मोटर व्हीकल नियम, 1989' मध्ये संशोधनस्य प्रारूपम् अधिसूचितम्। अस्मिन् आपत्कालीन-चिकित्सासेवायै 'द्विचक्र-मार्ग-एम्बुलेंस' (Two-wheeler Road Ambulance) प्रारब्धुं प्रस्तावः उपस्थापितः। मन्त्रालयेन सूचितं यत् एतेन दुर्घटनासु आपत्कालीन-स्थितिषु च रुग्णानां समीपम् त्वरितगतिः सुलभा भविष्यति। विशेषतः सुदूर-सङ्कीर्ण-स्थानेषु जनाः समये उपचारं लप्स्यन्ते। मन्त्रालयेन एका अपरा अधिसूचना अपि निर्गता। अस्याः अन्तर्गते वाहनेषु 'वाहन-तः-वाहन-सञ्चार-प्रणाल्याः' (Vehicle-to-Vehicle communication system) चरणबद्धरूपेण प्रवर्तनस्य प्रस्तावः अस्ति।

# 'बिग बॉस इति कार्यक्रमे भागं गृहीतवान् यूट्यूबर-मृदुलतिवारी अद्यापि बॉलीवुड- चलच्चित्रजगति अवसरं न प्राप्तवान्, यद्यपि एल्विशयादवः स्वकीयं प्रथमं चलच्चित्रं (डेब्यू) कर्तुं गच्छन् अस्ति




हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई। एल्विशयादवः मृदुलतिवारी च भारतस्य सर्वप्रियेषु यूट्यूबर-जनेषु अन्यतमौ स्तः। उभौ अपि सुदीर्घकालात् यूट्यूब-मञ्चे राज्यं कुरुतः। द्वाभ्याम् अपि "बिग बॉस" इति कार्यक्रमे भागः गृहीतः आसीत्। 'बिग बॉस' कार्यक्रमस्य अवधौ उभौ अपि अतीव चर्चायां आस्ताम्। तथापि, एतासां चर्चानां विशेषः लाभः मृदुलतिवारिणे न अलभत्। बिग बॉस इति कार्यक्रमस्य अवधौ मृदुलतिवारी अतीव चर्चासु आसीत्, किन्तु तदनन्तरं सः प्रायः लुप्तः एव अभवत्। अधुना सः केवलं स्वकीये यूट्यूबवाहिन्याः दृश्यश्रव्यपुटेषु एव दृश्यते। सामाजिकमाध्यमेषु अपि जनाः अधुना तस्य विषयः पूर्ववत् न चर्चयन्ति। अपरपक्षे, सः मनोरञ्जन- उद्योगे अपि विशेषं साफल्यं प्राप्तुं न अशक्नोत्। तस्मै नवीनानां प्रकल्पानाम् अवसराः अपि न लभ्यन्ते। बॉलीवुड-चलच्चित्रजगतः अपि तस्मै अद्यापि कश्चन महान् अवसरः न प्राप्तः। द्वितीयपक्षे तु, एल्विशयादवः 'बिग बॉस' इति कार्यक्रमे भागं गृहीत्वा महारथितायाः दिशि निरन्तरम् अग्रे सरति।

'बिग बॉस' कार्यक्रमानन्तरम् एल्विशयादवः निरन्तरं कार्यं प्राप्नोति। सः अद्यावधि बहुषु कार्यक्रमेषु जाल-श्रृङ्खलासु च दृश्यमानः अभवत्। अधुना तस्मै बॉलीवुड-चलच्चित्रस्य अपि प्रस्तावः लब्धः। एल्विशः टाइगर-श्रॉफमहोदयेन सह बृहत्-पटले पटलसहभागितां कर्तुं गच्छन् अस्ति। सः एकायाः महत्याः क्रीडा-प्रधान-चलच्चित्रस्य अङ्गं भवितुम् जातः।

# बेङ्गलुरुस्थेन भारतीय-विज्ञान-संस्थानेन अपशिष्ट-दुग्ध-स्यूतैः उच्च-प्रदर्शन-अभियन्त्रिकी-वस्तूनि निर्मितानि

हिमसंस्कृवार्ता रविः खरिडेहालः - बेङ्गलुरु ।बेङ्गलुरुस्थस्य भारतीय-विज्ञान-संस्थानस्य (IISc) शोधकैः अपशिष्ट-दुग्ध-स्यूतानां (प्लास्टिक-पुटकानाम्) उपयोगं कृत्वा उच्च-प्रदर्शन-युक्तानि अभियान्त्रिक-प्लास्टिक-वस्तूनि निर्मितानि सन्ति। एतेन प्रविधिना बहुवारं पुनरुपेयानि (पुनः उपयोक्तुं योग्यानि) स्थायि-प्लास्टिक-वस्तूनि निर्मातुं शक्यन्ते।'पर्यावरण-संशोधन-२०२५' (Environmental Research 2026) प्रतिवेदनस्य अनुसारम्, भारते प्रतिदिनं १० कोटितः १२ कोटि-पर्यन्तं दुग्ध-पुटकानि अपशिष्टरूपेण परित्यज्यन्ते। एषा सङ्ख्या प्रतिवर्षं ३६५० कोटितः ४३८० कोटि-पर्यन्तं भवति। एतानि पुटकानि भूमौ/पर्यावरणे एव विकीर्यन्ते, यत् प्रदूषणस्य महद् कारणं भवति।अस्याः नूतनायाः पुनश्चक्रण-प्रविधेः (recycling technology) साहाय्येन निर्मितानाम् एतेषां सामग्रीनां उपयोगः मार्ग-विभाजकानां (road dividers), सार्वजनिक-परिवहन-विश्रामस्थलानां (bus shelters) तथा अन्य-सार्वजनिक-संरचनानां निर्माणे सुलभतया कर्तुं शक्यते।

# युवकार्य-क्रीडामन्त्री डॉ. मनसुख माण्डविया राष्ट्रमण्डलक्रीडायाः भारोत्तोलन-पदकविजेतृभ्यः सम्मानम् अयच्छत्




युवकार्य-क्रीडामन्त्री डॉ. मनसुख माण्डविया ग्लास्गो-नगरे आयोजिते राष्ट्रमण्डलक्रीडायाः भारोत्तोलन-पदकविजेतृभ्यः सम्मानम् अयच्छत्। भारतीय-एथलीट-क्रीडकैः भारोत्तोलनस्य 11 भारवर्गेषु एकं स्वर्णम्, षट् रजतानि, एकं कांस्यम् इति आहत्य अष्ट पदकानि जितानि। क्रीडामन्त्री स्वर्णपदकविजेतृभ्यः 30 लक्षरूप्यकाणि, रजतपदकविजेतृभ्यः 20 लक्षरूप्यकाणि, कांस्यपदकविजेतृभ्यः च 10 लक्षरूप्यकाणां नकद-पुरस्कारान् प्रदत्तवान्। डॉ. माण्डविया क्रीडकान् क्रीडायाः दूताः (ambassadors) भवितुम् आहूतवान्, तान् विद्यालयेषु महाविद्यालयेषु च भ्रमणं कर्तुं प्राथयत्। डॉ. माण्डविया भारोत्तोलकान् वर्धापयन् अवदत् यत् कृत्स्नः देशः तेषाम् उपलब्धीनाम् उत्सवम् अमन्यत। सः सर्वेभ्यः प्रशिक्षकेभ्यः (coaches) कृतज्ञताम् प्राकटयत्।

# ओडिशानगरस्य कटके जगद्गुरु-कृपालु-विश्वविद्यालयस्य उद्घाटनम्



राष्ट्रपतिः द्रौपदी मुर्मू अवदत् यत् शिक्षा चरित्रनिर्माणस्य, सामाजिकपरिवर्तनस्य, राष्ट्रनिर्माणस्य च आधारशिला अस्ति। ओडिशानगरस्य कटके जगद्गुरु-कृपालु-विश्वविद्यालयस्य उद्घाटनं कुर्वती सा विश्वविद्यालयान् नैतिकान्, कुशलान्, सामाजिकरूपेण उत्तरदायिनः नागरिकान् निर्मातुं समाहूतवती। राष्ट्रपतिः अवदत् यत् शिक्षणसंस्थाः 'विकसित-भारतम् 2047' तथा 'विकसित-ओडिशा 2036' इत्येतयोः लक्ष्ययोः प्राप्तौ निर्णायकभूमिकां निर्वक्ष्यन्ति।



## पण्डित-गोपबन्धु-दासस्य प्रतिमायाः अनावरणम्

राष्ट्रपतिः द्रौपदी मुर्मू नवदिल्लीनगरे प्रसिद्ध-स्वतन्त्रतासेनानिनः समाजसुधारकस्य च उत्कलमणि-पण्डित-गोपबन्धु-दासस्य प्रतिमायाः अनावरणम् अकरोत्। गोपबन्धुदासः स्वतन्त्रता-आन्दोलने सक्रियेण भागं गृहीतवान्, सः एकः ख्यातः पत्रकारः च आसीत् यः 1919 वर्षे ओडिया-वार्तापत्रस्य 'द समाज' इत्यस्य आरम्भम् अकरोत्। वार्ताहारैः सह सम्भाषणे सांसदः अपराजिता सारङ्गी अवदत् यत् गोपबन्धुदासः ओडिशायाः एका महानुभावः अस्ति। श्रीमती सारङ्गी अवदत् यत् गोपबन्धुदासः पत्रकाररूपेण, कविरूपेण, स्वतन्त्रतासेनानिरूपेण च सराहनीयं कार्यम् अकरोत्।

# लघुकथा



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः



प्राचीनाः ज्ञानमूलकाः प्रेरकाः च बहुधा लघुकथाः उपलभ्यन्ते। तासु एकतमा लघुकथा अत्र उपस्थापयितुं प्रयत्यते। एकस्मिन् नगरे कश्चन धनाढ्यः पुरुष आसीत्। स आस्थावान् आसीत्, तस्मात् स एकं देवमन्दिरं निर्मातुम् ऐच्छत्। मन्दिरनिर्माणार्थं बहूनि वस्तूनि आवश्यकानि भवन्ति, अतः कर्मकराः तानि वस्तूनि सङ्गहीतुम् आरब्धवन्तः। तेषु कर्मकरेषु केचन काष्ठानां सङ्ग्रहणार्थम् एकम् अरण्यं प्रविष्टवन्तः। एकं महावृक्षं क्षित्वा च ते तं पातितवन्तः। तस्य क्रकचेन विदारणम् आरब्धवन्तः। तद्वृक्षस्य अर्धभागस्य विदारणं यदा समाप्तं तदा ते बुभुक्षिताः अभवन्। तदा ते अर्धविदीर्णस्य काष्ठखण्डस्य मध्ये एकं कीलकं संस्थाप्य आहारार्थं ततः नातिदूरे स्थितस्य नगरस्य एकं भोजनालयं प्रति प्रस्थितवन्तः।

तत्समये कश्चन वानरः तद् अर्धविदीर्णं काष्ठखण्डं विलोक्य तत्र समागतः। तद् दृष्टवतः तस्य कुतूहलं जातम्। तत्कीलकम् निष्कासयितुं स बहुधा प्रयत्नम् अकरोत्, परन्तु न शक्तवान्। तदनन्तरं स काष्ठखण्डस्य मध्यभागे सम्यक्तया उपविष्टवान्। काष्ठखण्डस्य मध्ये योजितं कीलकम् उत्पाटयितुं पुनरपि प्रयत्नं कृतवान्। महता प्रयत्नेन तत्कीलकस्य उत्पाटने स कथञ्चित् समर्थो जातः। कीलकं तु बहिरागतं, परन्तु तन्मध्ये संलग्नौ तस्य पादौ भग्नौ, विनष्टौ च अभवताम्। अतिपीडया सन्त्रस्तः, चित्कुर्वन् च अन्ते स वानरः तत्रैव मरणं प्राप्तवान्।

कथायाः तात्पर्यं यत्, यो मनुष्यः अकर्तव्येष्वपि कार्येषु संलग्नो भवति, स कीलोत्पाटी वानर इव अवश्यं विपदि पततीति।

# हास्यकणिका

**पुत्रः-** अम्ब! विवाहानन्तरं भार्या स्वपतिना सह सदा किमर्थं कलहं करोति?

**माता-** वत्स! विवाहानन्तरं मातापित्रोः स्थाने श्वश्रूश्वशुरौ लभ्येते, भ्रातृभगिन्योः स्थाने ननन्दा देवरश्च लभ्येते। किन्तु पतिः तु विनामूल्यं लभ्यते खलु। यत् विनामूल्यं लभ्यते, तस्य प्रायः काचिदपि महत्त्वं न भवति। 🤣 **पुत्रः-** 😕 😞




# लौकिकन्यायकोशः
## अब्धिफेनादिन्यायः

समुद्रः फेनं च इति अस्य न्यायस्य उपयोगः अद्वैतवेदान्तस्य ग्रन्थेषु दृश्यते। समुद्रे फेनं, तरङ्गाः इत्यादयः दृश्यन्ते चेदपि तेषां स्वतन्त्रम् अस्तित्वं न भवति। समुद्रात् ते भिन्ना इति आभासः भवति। समुद्रे या विक्षेपरुपेण माया भवति तस्याः कारणेन द्रष्टुः तराङ्गादिकस्य आभासः भवति। तथैव ब्रह्मणः या विक्षेपशक्तिसहिता माया भवति तस्याः कारणेन जगतः तस्मिन् वर्तमानानां विभिन्नानां पदार्थानां च आभासः भवति। अयम् आभासात्मकः विवर्तः। एतस्मात् जगत् उत्पन्नम् इव भाति। अयम् एव नामरूपात्मकः विस्तारः।
शङ्कराचार्याः एतम् एव दृग्दृश्यविवेक इति कथयन्ति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य एका विचित्रा वार्ता मया श्रुता। पाश्चात्य-देशस्य समुद्रतटे शुनां तरङ्ग- क्रीडास्पर्धा आयोजिता। तत्र कुक्कुरैः तरङ्ग- फलकोपरि क्रीडितम्। जनैः तत् दृष्ट्वा मोदः अनुभूतः।

**नन्दिनी-** अहो! श्वभिः तरङ्गक्रीडा कृता इति अतीव कौतुकावहम्। मया अन्या वार्ता पठिता। कृत्रिमबुद्धेः ज्ञानवर्धनार्थं चतुश्शत-वर्ष-प्राचीनं मतान्वेषणसम्बद्धं पत्रम् अङ्गीकृतम्। ततः तत् प्राचीनपत्रं यन्त्रचालकैः नाशितम्। एतत् अतीव खेदजनकम्।

**काव्या-** सत्यम्, प्राचीनग्रन्थानां नाशः न समीचीनः। आकाशमण्डले अपि एका विचित्रा घटना खगोलशास्त्रज्ञैः दृष्टा। अन्तरिक्षे एकः त्रिदलयुक्तः क्षुद्रग्रहः अन्विष्टः। तेन सह तस्य निजः लघुचन्द्रः अपि खगोल-शास्त्रज्ञैः प्राप्तः।

**नन्दिनी-** क्षुद्रग्रहस्य स्वकीयः चन्द्रः अस्ति इति विस्मयकरम्। तन्त्रज्ञानक्षेत्रे अपि एका नूतना समस्या दृष्टा। एकया कृत्रिमबुद्ध्या अन्या कृत्रिमबुद्धिः वञ्चिता। तन्त्रज्ञानसंस्थायाः प्रमुखेन उक्तम् यत् एषः सुरक्षाभङ्गः अतीव-अपूर्वः अस्ति। एतादृशं पूर्वं न केनापि अनुभूतम्।

**काव्या-** आम्, तन्त्रज्ञः इमां वार्ताम् उक्तवान् अस्ति। कृत्रिमबुद्धेः व्यवहारः अतीवविचित्रः सञ्जातः। अद्यतनः कार्यक्रमः अत्रैव समाप्यते।

# भगवतः शिवस्य प्रियमासः श्रावणमासः



उत्तराखण्डराज्यस्य सन्दर्भे हरेला (पर्यावरणसंक्षणपर्व) महोत्सवस्य (संक्रान्तिः) आगमनेनेव पवित्रश्रावणमासस्य अपि आरम्भः भवति। अस्मिन् श्रावणमासे भगवतः शिवस्य पूजा (अर्चना) अतीव सात्विकी, कामनापूर्तिदायिनी च अस्ति। श्रावणमासः "शिवस्य" कृते अतीव प्रियः। अतः अस्मिन् मासे सः स्वशक्त्या सह संयोगं प्राप्य सम्पूर्णसृष्टिं सृजति।

शिवः- सर्वेषां संरक्षकः देवः-

भारतीय परम्परायां शिवः परब्रह्म, परमात्मा, रुद्र, महादेव इत्यादिभिः नाम्भिः प्रसिद्धः अस्ति। 'शिव' शब्दस्य एकस्याः व्याख्यानुसारं शाश्वततापेन तृप्ताः भूत्वा यत्र प्राणिनः विश्रामार्थं स्वपिन्ते अथवा यस्मिन् जगति जगत् विनाशावस्थायां निद्रां करोति तत् 'शिव'- 'शेरते प्राणिन यात्रा स शिवः' इति उच्यते अथवा 'शेते जगदस्मिन्निति शिवः'। भगवतः रामकृष्णश्च क्रमशः त्रेता-द्वापरायुगे दृश्यन्ते, परन्तु सृष्टेः आरम्भादेव प्रत्येकयुगे दरिद्राणां, दुर्बलानाम्, असहायानां, सर्वहाराणां च रक्षकः शिवः अस्ति।

## श्रावण शिव-शक्ति-कृपामास-

भारतीयपरम्परायां श्रावणमासः अतीव पवित्रः इति मन्यते। अयं मासः सम्पूर्णतया भगवते शिवाय समर्पितः अस्ति। अस्मिन् मासे शिवस्य विधिपूर्वकं पूजां कृत्वा मनुष्यः अपि शुभफलं प्राप्नोति। श्रावणमासस्य विशेषः महिमा अपि अस्ति यतोहि अस्मिन् मासे एव माँ भगवती पार्वती शिवं प्राप्तुं तीव्रं तपस्यां कृतवती आसीत् यथा तस्याः पतिः शिवः अपि अस्मिन् मासे प्रकटितः आसीत्। ततः प्रभृति श्रावणमासः शिवस्य तपस्यापूजां कृत्वा तस्य आशीर्वादप्राप्त्यर्थं विशेषः शुभमासः इति गण्यते। पुराणानुसारं भगवतः शिवस्य अभिषेकद्वारा, पूजनद्वारा, श्रावणमासे मन्त्रजपादधिकः परिणामः प्राप्यते। शिवः शक्तिश्च विशेषतया सोमवासरे महादेवस्य पूजां कृत्वा प्रसन्नौ भवतः। तस्य प्रसादात् मनुष्यः दिव्य- शारीरिक- भौतिक- दुःखेभ्यः मुक्तिं प्राप्नोति। निर्धनाः धनं प्राप्नुवन्ति, अपुत्राः सन्ततिं प्राप्नुवन्ति, अविवाहिताः बालिकाः इष्टं वरं प्राप्नुवन्ति।

**श्रावणमासः शिवस्य प्रियः किमर्थम्?**

भारतस्य सम्पूर्णस्य उपमहाद्वीपस्य कृते शुभः श्रावणः मासः कृषिक्षेत्रस्य, कृषिकार्यस्य च विशेषः मासः अस्ति, यतः सः नैर्ऋत्यस्य मानसून इत्यस्य आगमनेन सह सम्बद्धः मासः अस्ति। पृथिव्याः उदरे सृष्टिबीजानां अंकुरणात् अस्मिन् मासे प्रकृतेः प्रत्येकं कणः हरितपूर्णः एव तिष्ठति। भगवान् शिवः श्रावणमासं वर्षस्य सर्वाधिकं प्रियं मासं मन्यते यतोहि श्रावणमासे सर्वाधिकं वर्षा भवति, यत् शिवस्य तपश्चर्यया तप्ताय शरीराय शीतलतां शान्तिं च ददाति। पौराणिककथासु भगवान् शङ्करः स्वयं सनत्कुमारेभ्यः श्रावणमासस्य महिमा वर्णयित्वा मम त्रयोऽपि नेत्रेषु दक्षिणे सूर्यः, वामे चन्द्रः, मध्यनेत्रे अग्निः च वर्तते इति उक्तवान्।

भारतीयगणनायां नक्षत्राधारेण मासानां नामानि स्थापितानि सन्ति। यतो हि वर्षस्य प्रथमः मासः चैत्रः, यः चित्रानक्षत्राधारितः अस्ति, तथैव श्रावणमासः 'श्रवण' नक्षत्राधारितः भवति। महत्त्वपूर्णं यत् श्रवणनक्षत्रस्य स्वामी अपि चन्द्रः अस्ति। शिवस्य शिरस्यपि चन्द्रः। यदा सूर्यः कर्कं प्रविशति यस्य प्रभुः चन्द्रः तदा श्रावणमासः आरभ्यते अर्थात् सूर्यः उष्णः भवति, सः शीतलग्रहस्य चन्द्रस्य गृहे प्रविशति, अतः ऋतु दृष्ट्या यदा सूर्यः कर्कराशिं प्रविशति तदा वर्षाऋतुः आरभ्यते, यस्य फलस्वरूपं महादेवः यः जनहिताय विष सेवते तथा च निरन्तर तपश्चर्यया देवाधिदेव शिवः चन्द्रस्वरूपप्रतिरूप पार्वत्याः सङ्गात् शीतलता तथा आनन्दस्य भावः प्राप्नोति। अत एव शिवस्य श्रावणमासस्य प्रति अत्यधिकी आसक्तिः अस्ति। अस्मिन् मासे शिवः स्वस्य प्रकृतिशक्तिपार्वत्या सह मिलित्वा मानवान् प्रति स्वस्य दयालुतां प्रकटयितुं जनानां हिताय सज्जः एव तिष्ठति।

## श्रावणमासः शिवशक्तिसमागममासः-

भारतीयज्योतिषशास्त्रानुसारं सूर्यग्रहः पितुः उग्रः करकः च ग्रहः, शीतलप्रकृतेः चन्द्रः च मातृत्वस्य करकग्रहः इति मन्यते। श्रावणमासः एतयोः समागममासः। श्रावणमासे मेघरूपं शिवः पार्वतीं हिमरहितप्रकृतिं विवाहयितुं गच्छति, यस्मात् कारणात् ऋतुवृष्टिः (मानसूनवृष्टिः) भवति, पृथिवी च तस्य रूपं गृह्णाति रत्नगर्भा वसुन्धरा। अनेन वृष्ट्या पृथिव्यां नद्यः प्रवहन्ति, वनस्पतिधनं फलपुष्पाणि च उत्पाद्यन्ते, क्षेत्रेषु अन्नधान्यानि वर्धन्ते, सर्वे जीवाः पोष्यन्ते च। श्रावणमासस्य वैज्ञानिकस्वभावः। श्रावणस्य आगमनात् पूर्वं प्रबोधनी एकादशीदिनात् आरभ्य जगतः पालकस्य सर्वेभ्यः दायित्वेभ्यः मुक्तः विष्णुः स्वस्य दिव्यनिवासं पाताललोकं विश्रामार्थं प्रस्थाय स्वस्य सर्वं कार्यं "महादेव शिवाय" समर्पयति। तेन सह मिलित्वा, अस्मिन् श्रावणमासे जगतः निर्माता जगतः पोषणस्य दायित्वं निर्वहति। शिवः पार्वतीश्च जगतः मातापितृत्वेन पृथिव्याः जनानां सुखानि दुःखानि च अवगत्य स्वकामान् अपि पूरयन्ति, अतः श्रावणमासः अर्धनारीश्वरशिवस्य समाराधनस्य विशेषः मासः इति कथ्यते।

### उत्तराखण्डराज्यं शिवशक्तेश्च अभिसरणभूमिः-

उत्तराखण्डराज्यस्य हिमालयक्षेत्रं भगवतः शिवस्य क्रीडाक्षेत्रम् अस्ति। अत्र शिवशक्तयोः संयोगात् लोकसंस्कृतेः अपि विकासः अभवत्। यथा- हिमालये तु केदारम्..........।

वस्तुतः उत्तराखण्डस्य शक्तिपूजाविषये महाकवि-कालिदासस्य "जगतः पितरौ वन्दे पार्वती- परमेश्वरौ" इति अवधारणायाः प्रभावेण प्रभाविता अस्ति, तदनुसारं शिवः शक्तिश्च (माता पिता) जगतः निर्माता इति रूपेण पूज्यन्ते। यथा-

**वागार्थविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**

**शब्दार्थः-**

वागार्थसिद्धये (वागर्थप्रतिपत्तये) जगतः (सृष्टेः) मातापितरौ (पितरौ) शिवपार्वतीं (पार्वतीपरमेश्वरौ) वाक्-अर्थ (वागार्थविव) एकीकृत (संप्रक्तौ) इति (वन्दे) पूजयामि।

**सारः-**

वाक्-अर्थ-समं जगतः मातापितरौ पार्वतीं शिवं च अहं (कालिदासः) वाक्-अर्थ-सिद्ध्यर्थं नमामि।

## शिवशक्तिभ्याञ्च प्रेरिता उत्तराखण्डस्य लोक- संस्कृतिः-

उत्तराखण्डस्य मुख्या लोकसंस्कृतिः शिवशक्त्या प्रेरिता लोकसंस्कृतिः एव अभवत्। गढ़वाल- कुमाऊँ-मण्डलयोः आयोजिताः उत्सवाः आधिक्येन शिवस्य श्रेष्ठभावेन च प्रेरिताः सन्ति। उत्तराखण्डस्य नन्दाराजजातयात्रा महान् उत्सवः अस्ति राज्जातः अथवा नन्दाजातस्य अर्थः राजराजेश्वरी नन्दादेव्याः यात्रा। गढ़वालप्रदेशे देवजातीनां यात्रा महता उत्साहेन आस्थया आचर्यते। यस्यार्थः जातिर्देवयात्रा इत्यर्थः। भाद्रपदमासस्य कृष्णपक्षे नन्दादेवी स्वस्य मैत (मातुः गृहं) गच्छति इति लोकोक्तयः प्रचलिताः सन्ति। कतिपय दिनानन्तरं ते अष्टमीदिने मैतनगरं प्रति प्रेष्यन्ते। राज्जातं वा नन्दाराज्जातं वा नन्दादेव्याः सुसज्जितवधूरूपेण स्वसहचरात् स्वश्वशुरगृहं प्रति यात्रा। स्वसुरः स्थानीयभाषायां सौराः इति कथ्यते। अस्मिन् अवसरे नन्दादेवीं अलंकृत्य डोलायाम् उपविश्य वस्त्रं, आभूषणं, अन्नधान्यं, कलेवा, दूज, दहेज इत्यादीनि उपहाराः दत्त्वा पारम्परिकगढ़वालस्य विदाई इव प्रेषयन्ति। यद्यपि प्रतिवर्षं नन्दाजातस्य आयोजनस्य अभ्यासः अस्ति तथापि द्वादशवर्षे भव्यं मनोरञ्जकं च राज्जातं भवति। नन्दाजातं प्रतिवर्षं शुक्ल-अष्टमी-दिने आचर्यते। नन्दाष्टमीदिने नन्दा डोलायां प्रेष्यते। नैनीताल- बैजनाथ-अल्मोड़ा-नगरेषु अयं उत्सवः विशेष- योजनानुसारेण आचर्यते। नैनीतालस्य प्रसिद्धः नन्दा-सुनन्दा-मेला प्रतिवर्षम् आयोज्यते, यस्मिन् कदलीवृक्षेण निर्मिताः नन्दा- सुनन्दा-भगिनीनां विशिष्टा अद्वितीयाः च प्रतिमाः ये सम्पूर्णे भारते कुमाऊँ-मण्डले एव निर्मिताः सन्ति अन्ते मूर्तिः नैनीसरोवरे निमग्नः भवति।

कुमाऊँ मण्डले माँ भगवत्याः नन्दायाः (पार्वत्याः) एकं वैशिष्ट्यं वर्तते यत् गरुडस्य कोटभ्रामरी मन्दिरे नन्ददेवी पुरुषशरीरेण अवतारिता भवति, उत्तराञ्चलस्य अन्येषु क्षेत्रेषु तु देवी स्त्रीशरीरेण अवतारिता भवति, देवता पुरुषशरीरे अवतारितः भवति।

ईष्टदेव्याः स्थानं प्राप्य सा नन्ददेवी राजराजेश्वरी इति सम्बोधिता। नन्दादेवी दक्षप्रजापतेः सप्तसु कन्यासु अन्यतमा आसीत्। तस्याः विवाहः भगवतः शिवेण सह अभवत्। नन्ददेवी पार्वतीरूपा स्मृता। सम्पूर्णे उत्तराखण्डे समानरूपेण आराध्यत्वात् नन्ददेवी उत्तराखण्डस्य कुलदेवीरूपेण, धर्मेकतायाः सूत्रे समग्रं राज्यं सूत्रीकृत्य शिवस्य पत्नीरूपेण च पूज्यते।

अस्मिन् शुभे श्रावणमासे जगतः पिता भगवतः शिवस्य तथा जगन्माता भगवती पार्वतीमातुश्च अस्मान् प्रति सर्वदा सुख, शान्तिः एवं आनन्देन परिपूर्णं वात्सल्यमयी भावः तथा आशीर्वादः चिरस्थायी स्यात्।

ॐ नमः शिवाय।



**-डॉ. सन्तोषकुमारकाण्डपालः**
**सहायकाचार्यः (शिक्षाशास्त्र-विभागः)**
**महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयः,**
**उज्जयिनी, मध्य-प्रदेशः**